
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 06/03/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 06/03/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 10/08/2012 | **First Proof Reading** | **Narahari Rattihally** |
| 4 | 10/08/2012 | **Proof Correction** | **H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

## ॥ (यति) प्रणवकल्पः ॥

समिच्चर्वाज्यकान् हुत्वा सम्यक् पुरुषसूक्ततः ।
सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिम् ॥ 01 ॥

श्रुत्वा भागवतं शुद्धमाचार्यं शरणं व्रजेत् ।
अधीहि भगवो ब्रह्मेत्यस्मै ब्रूयाद्गुरुः परम् ॥ 02 ॥

उच्चारयंस्त्रिशस्तारं दक्षिणे श्रवणे तथा ।
ऋषिच्छन्दोदैवतानि ब्रूयात् तस्य क्रमात्सुधीः ॥ 03 ॥

अन्तर्यामीति गायत्री परमात्मेत्यनुक्रमात् ।
विश्वश्च तैजसः प्राज्ञस्तुर्यश्चाक्षरदेवताः ॥ 04 ॥

कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च ।
परञ्ज्योतिः परंब्रह्म वासुदेव इति क्रमात् ॥ 05 ॥

अकारादेस्तथा शान्तातिशान्तान्तस्य देवताः ।
एवमुक्त्वा तु तद्ध्यानं ब्रूयाच्छिष्याय सद्गुरुः ॥ 06 ॥

अष्टपत्रे तु हृत्पद्ममध्ये सूर्येन्दुवह्निगम् ।
पीठं तन्मध्यपद्मस्थं नारायणमनामयम् ॥ 07 ॥

उद्यदादित्यसङ्काशं तेजसाऽनुपमम् सदा ।
सहस्रेणापि सूर्याणां सज्ज्ञानानन्दरूपिणम् ॥ 08 ॥

अतिरक्ततलं भास्वन्नखराजिविराजितम् ।
वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम् ॥ 09 ॥

महाकटितटाबद्धकाञ्चीपीताम्बरोज्वलम् ।
निम्ननाभिं सुत्रिवलिं सुवृत्तोदरबन्धनम् ॥ 10 ॥

विशालवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
वनमालाधरं हारवैजयन्त्यादिभिर्युतम् ॥ 11 ॥

पृथुदीर्घचतुर्बाहुं शङ्खचक्रगदाम्बुजैः ।
युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुण्डलम् ॥ 12 ॥

पूर्णचन्द्रायुतोद्रिक्तकान्तिमन्मुखपङ्कजम् ।
सुभ्रुवं सुललाटान्तं किरीटाबद्धमूर्धजम् ॥ 13 ॥

निःशेषदुःखशमनं नित्यानन्दशुचिस्मितम् ।
विश्वादींश्चैव कृष्णादीनेवंभूतान् सनातनान् ॥ 14 ॥

अभिन्नानेव सततं तस्माद्विष्णोः परात्मनः ।
वराभयोद्यतकरान् नित्यानन्दैकरूपिणः ॥ 15 ॥

एवमुक्त्वा गुरुर्ध्यानं शपथं कारयेत् ततः ।
न विष्णुं वैष्णवांश्चैवाप्युत्सृजेयमिति त्रिशः ॥ 16 ॥

न चान्यदेवतासाम्यं तदैक्यमथवाहरेः ।
चिन्तयेयं मृतो वाऽपि न चाप्येकत्ववादिभिः ॥ 17 ॥

समत्ववादिभिर्वाऽहं सङ्गच्छेयं कथञ्चन ।
तन्निन्दकैश्च तद्भक्तनिन्दकैर्वा महामुने ॥ 18 ॥

एवं कृते तु शपथे मस्तके हस्तपङ्कजम् ।
निधायोत्तीर्य संसारात् सुखी भव हरेः प्रियः ॥ 19 ॥

सर्वदुःखादिभिर्मुक्तो नित्यानन्दैकरूपिणः ।
सम्प्राप्य विष्णुसामीप्यं तत्रापि हरिभक्तिमान् ॥ 20 ॥

भक्तिमांश्चान्यदेवेषु तारतम्यं च सर्वदा ।
सर्वोत्कर्षं स्मरन् विष्णोर्भूयाश्चैव सदा सुखी ॥ 21 ॥

न मुक्तौ विष्णुनैक्यं वा मुक्तानां साम्यमेव वा ।
स्मरेथा इति चोक्त्वा तु समयाननुशिक्षयेत् ॥ 22 ॥

नित्यशश्च हरेः पूजा जपध्यानसमर्पणम् ।
कर्तव्यं तु त्वया वत्स जपश्च त्रिसहस्रकः ॥ 23 ॥

मध्यमः प्रणवस्योक्तो योऽवरः स सहस्रकः ।
त्रिसहस्रात् परो यस्तु स उत्तमजपः स्मृतः ॥ 24 ॥

आत्मानं प्रतिबिम्बत्वे ध्यायन् बिम्बं जनार्दनम् ।
ध्यायंश्च सततं वत्स सपर्यां नित्यशः कुरु ॥ 25 ॥

मानसैवार्थ पुष्पैर्वा प्रणवेन समाहितः ।
अन्यांश्च वैष्णवान् मन्त्रान् जपेथा भक्तिपूर्वकम् ॥ 26 ॥

शृणुष्व वैष्णवं शास्त्रं सदा वेदार्थतत्परः ।
वेदान् मन्त्रानुपनीषत्सहितान् सर्वदा शृणु ॥ 27 ॥

इतिहासपुराणे च पञ्चरात्रं तथैव च ।
तदर्थान् ब्रह्मसूत्रैश्च सम्यङ्निर्णीय तत्त्वतः ।
विष्णोः सर्वोत्तमत्त्वं तु सर्वदा प्रतिपादय ॥ 28 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितः (यति)प्रणवकल्पः ॥

॥ श्री कृष्णार्पणमस्तु ॥
॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥
॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥